Downloaded From : http://cbseportal.com/

This Question Paper consists 35 questions and 4 printed pages.
अस्मिन् प्रश्नपत्रे 35 प्रश्नाः एवम् 4 मुद्रित पृष्ठाः सन्ति ।

Roll No. / अनुक्रमाङ्कः | | | | | | | | | | | | |

Code No. 59/SS/O
गूढसंख्या

Set / स्तबकः **A**

# BHARATIYA DARSHAN
# भारतीयदर्शनम्
# (347)

Day and Date of Examination
(परीक्षादिवसः दिनाङ्कश्च) ______________________

Signature of Invigilators 1. ______________________
(निरीक्षकयोः हस्ताक्षरम्)
2. ______________________

---

**सामान्या निर्देशाः :**

1. अनुक्रमाङ्कः प्रश्नपत्रस्य प्रथमपृष्ठे नूनं लेख्यः ।
2. निरीक्ष्यताम् यत् प्रश्नपत्रस्य पृष्ठसंख्या प्रश्नानां संख्या च प्रथमपृष्ठस्य प्रारम्भे प्रदत्तसंख्या समाना न वा । प्रश्नक्रमः सम्यग् न वा ।
3. वस्तुनिष्ठप्रश्नानाम् (क), (ख), (ग), (घ) एषु विकल्पेषु युक्तम् उत्तरं चित्वा उत्तरपत्रे लेख्यम् ।
4. समेषां प्रश्नानाम् उत्तराणि निर्धारितसमये एव लेख्यानि ।
5. उत्तरपत्रे आत्मपरिचयात्मकं लेखनम् अथवा निर्दिष्टस्थानं विहाय अन्यत्र क्वापि अनुक्रमाङ्कलेखनं सर्वथा वर्जितमस्ति ।
6. स्वस्य उत्तरपत्रे प्रश्नपत्रस्य गूढसंख्या 59/SS/O-A नूनं लेख्या ।
7. समेषां प्रश्नानाम् उत्तराणि संस्कृतभाषया एव लेख्यानि ।



Downloaded From : http://cbseportal.com/ Courtesy : NIOS

Downloaded From : http://cbseportal.com/

# BHARATIYA DARSHAN

## भारतीयदर्शनम्

## (347)

**परीक्षासमयावधिः (Time) होरात्रयम् (3 Hrs)]** **[पूर्णाङ्काः (Full Marks) : 100**

**निर्देशाः :**

**(1)** अस्मिन् प्रश्नपत्रे [A] भागे **10**, [B] भागे **10**, [C] भागे **10**, [D] भागे **5** इति आहत्य **35** प्रश्नाः सन्ति ।

**(2)** प्रश्नस्य दक्षिणे पार्श्वे संख्यासु (अङ्काः × प्रश्नाः = पूर्णाङ्काः) इति एवम् अङ्कान् निर्दिशति ।

**(3)** **सर्वे** प्रश्नाः **अनिवार्याः** ।

[A] दशानां युक्तं विकल्पं चिनुत । **1×10=10**

(1) सांख्यकारिकाः केन लिखिताः ?

(क) ईश्वरकृष्णेन (ख) वाचस्पतिमिश्रेण

(ग) आसुरिणा (घ) सदानन्दयोगीन्द्रेण

(2) असत्कार्यवादः कैः अङ्गीक्रियते ?

(क) बौद्धैः (ख) सांख्यैः

(ग) नैयायिकैः (घ) अद्वैतवेदान्तिभिः

(3) के अनुमानप्रमाणं न अङ्गीकुर्वन्ति ?

(क) चार्वाकाः (ख) वेदान्तिनः

(ग) भाट्टाः (घ) बौद्धाः

(4) वेदान्तिनां मते कति प्रमाणानि ?

(क) चत्वारि (ख) पञ्च

(ग) षट् (घ) अष्ट

(5) उपपाद्यज्ञानेन उपपादककल्पनम् इति कस्य प्रमाणस्य लक्षणम् ?

(क) अनुपलब्धेः (ख) अर्थापत्तेः

(ग) उपमानस्य (घ) पुराणस्य



Downloaded From : http://cbseportal.com/ Courtesy : NIOS

Downloaded From : http://cbseportal.com/

(6) वेदान्तमते सिद्धान्तपक्षे लक्षणायाः बीजं किम् ?

(क) अन्वयानुपपत्तिः (ख) तात्पर्यानुपपत्तिः

(ग) अर्थानुपपत्तिः (घ) शब्दानुपपत्तिः

(7) सृष्टिविचारप्रसङ्गे अद्वैतवेदान्तिनां कः न्यायः प्रसिद्धः ?

(क) तृणारणिमणिन्यायः (ख) शाखाचन्द्रमसन्यायः

(ग) अध्यारोपापवादन्यायः (घ) तिलतण्डुलन्यायः

(8) कस्याम् उपनिषदि तेजःप्रमुखा सृष्टिः प्रतिपाद्यते ?

(क) तैत्तिरीयोपनिषदि (ख) कठोपनिषदि

(ग) बृहदारण्यकोपनिषदि (घ) छान्दोग्योपनिषदि

(9) अयमनुबन्धेषु अन्यतमः कः ?

(क) शमः (ख) विवेकः

(ग) प्रयोजनम् (घ) वैराग्यम्

(10) सुखस्य हेतुः कः ?

(क) धर्मः (ख) अधर्मः

(ग) कर्म (घ) अज्ञानम्

**[B]** दशानां यथानिर्देशम् उत्तराणि लघूनि लिखत । **2×10=20**

(1) मनसः ज्ञानकर्मेन्द्रियत्वं किमर्थम् ? 2

(2) सांख्यमते तत्त्वानां सृष्टिक्रमं संक्षेपेण लिखत । 2

(3) के लक्षणदोषाः ? यथेच्छम् एकस्य लक्षणदोषस्य लक्षणं लिखत । 1+1

(4) ईश्वरः कः ? ईश्वरसाक्षी च कः ? 1+1

(5) तात्पर्यं नाम किम् ? आसत्तिः नाम का ? 1+1

(6) मायासिद्धौ एकं श्रुतिप्रमाणम् एकं च स्मृतिप्रमाणं दीयताम् । 1+1

(7) प्रातिभासिकत्वे नियामकं किं भवति ? शुक्तिरजतोत्पत्तौ इन्द्रियदोषः कः ? 1+1

(8) अद्वैतवेदान्तशास्त्रस्य किं तावत् प्रयोजनम् ? कीदृशे विषये विचारः सम्भवति ? 1+1

(9) किं तावत् मननम् ? समाधिद्वयं किम् ? 1+1

(10) ध्यानं नाम किम् ? ध्यानविषये पातञ्जलं सूत्रं किम् ? 1+1



Downloaded From : http://cbseportal.com/ Courtesy : NIOS

Downloaded From : http://cbseportal.com/

**[C]** दश अनतिदीर्घोत्तरैः समाधत्त । **4×10=40**

(1) भारतीयानाम् आस्तिकदर्शनानां नास्तिकदर्शनानां च परिचयः प्रदीयताम् ।

(2) चतुर्णाम् अभावभेदानां समासेन परिचयः प्रदीयताम् ।

(3) तत्त्वमसि इति महावाक्यात् कथं निर्विकल्पकं ज्ञानं भवति इति पर्यालोचयत ।

(4) अद्वैतवेदान्तमते ज्ञानेन्द्रियाणि कर्मेन्द्रियाणि च कस्मात् उत्पद्यन्ते इति समासेन वर्णयत ।

(5) अविद्यायाः अनिर्वचनीयत्वं नाम किमिति वर्ण्यताम् ।

(6) अद्वैतवेदान्तमते सृष्टिप्रयोजनं किमिति समासेन लिखत ।

(7) अध्यासलक्षणविषये लघुटिप्पणीं लिखत ।

(8) तत्त्वमसि इति महावाक्ये त्वम्–पदस्य वाच्यार्थः लक्ष्यार्थश्च कः इति आलोच्यताम् ।

(9) मनसः अनिन्द्रियत्वं किमर्थमिति सप्रमाणं विचारयत ।

(10) काम्यं निषिद्धं नित्यं नैमित्तिकं च कर्म समासेन वर्ण्यताम् ।

**[D]** पञ्च दीर्घोत्तरैः समाधेयाः । **6×5=30**

(1) पुरुषसद्भावे यानि कारणानि सांख्यकारिकायां निगदितानि तानि संक्षेपेण आलोच्यन्ताम् ।

(2) ब्रह्मणः तटस्थलक्षणं वैशद्येन प्रतिपाद्यताम् ।

(3) अध्यासभेदान् संक्षेपेण वर्णयत ।

(4) निर्विकल्पसमाधेः अङ्गानि कानि ? तेषां समासेन परिचयः दीयताम् ।

(5) विवेकानन्दस्य समन्वयभावं संक्षेपेण वर्णयत ।



Downloaded From : http://cbseportal.com/ Courtesy : NIOS